योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३८

अष्टत्रिंशः सर्गः ३८

श्रीवसिष्ठ उवाच ।

एवमत्याकुले युद्धे सास्फोटभयसंकुले ।

आदित्ये तमसा वृद्धे चटत्कठिनकङ्कटे ।। १

वहत्यम्बूत्पतन्तीषु पतन्तीष्वश्मवृष्टिषु ।

नदीषु क्षेपणाच्छासु वरकेष्वब्जपङ्क्तिषु ।। २

मिथः फलाग्रकाटोत्थवह्निसीकरिणीषु च ।

आयान्तीषु प्रयान्तीषु दूरं शरनदीषु च ।। ३

वहल्लूनशिरःपद्मचक्रावर्तैस्तरङ्गितैः ।

खार्णवे पूरिते हेतिवृन्दमन्दाकिनीगणैः ।। ४

समीरणरणत्क्वाणशस्त्रपूर्णघनैर्घनैः ।

संदेहान्तेषु सिद्धेषु कपिकच्छव्यथाप्रदैः ।। ५

अष्टभागदशाशेषप्रतापमधुराकृति ।

शस्त्रघातौजसा वीर इवाहस्तनुतां ययौ ।। ६

श्रान्ताश्वेभाः प्रभग्नाश्च हेतिसंघातदीप्तयः ।

दिवसेन समं सेना ययुर्मन्दप्रतापताम् ।। ७

अथसेनाधिनाथाभ्यां विचार्य सहमन्त्रिभिः ।

दूताः परस्परं वृत्ता युद्धं संह्रियतामिति ।। ८

तत्र श्रमवशान्मन्दयन्त्रशस्त्रपराक्रमैः ।

रणसंहरणं काले सर्वैरेवोररीकृतम् ।। ९

ततो महारथोत्तुङ्गकेतुप्रान्तकृतास्पदम् ।

बलयोरारुहोहैक एको योधो ध्रुवो यथा ।। १०

सोंऽशुकं भ्रामयामास सर्वदिङ्मण्डले सितम् ।

श्यामेव दीर्घशुद्धांशुं युद्धं संह्रियतामिति ।। ११

ततो दुन्दुभयो नेदुः प्रतिध्वनितदिङ्मुखाः ।

महाप्रलयसंशान्तौ पुष्करावर्तका इव ।। १२

शरादिहेतिसरितो विस्तीर्णे गगने स्थिते ।

प्रवृत्ताः सुखमागन्तुं सरसः सरितो यथा ।। १३

योधदोर्द्रुमसंचारस्तनुतामाययौ शनैः ।

भूकम्पान्ते वनस्पन्द इवाभ्रान्त इवार्णवः ।। १४

विनिर्गन्तुं प्रववृते रणादथ बलद्वयम् ।

वारिपूरश्चतुर्दिक्षु प्रलयैकार्णवादिव ।। १५

उत्क्षिप्तमन्दरक्षीरसमुद्रवदनाकुलम् ।

सैन्यं प्रशाम्यदावर्तं शनैः साम्यमुपाययौ ।। १६

क्रमेणासीन्मुहूर्तेन विकटोदरभीषणम् ।

अगस्त्यपीतार्णववच्छून्यमेव रणाङ्गणम् ।। १७

शवसन्ततिसंपूर्णं वहद्रक्तनदाकुलम् ।

परिकूजनझङ्कारपूर्णझिल्लिवनोपमम् ।। १८

बहद्रक्तसरित्स्रोतस्तरङ्गारवघर्घरम् ।

साक्रन्दार्धमृताहूतसप्राणव्यग्रमानवम् ।। १९

मृतार्धमृतदेहौघसृतासृक्प्लुतनिर्झरम् ।

सजीवनरपृष्ठस्थशवस्पन्दनभ्रान्तिदम् ।। २०

करीन्द्रशवराश्यग्रविश्रान्ताम्बुदखण्डकम् ।

विशीर्णरथसंघातं वातच्छिन्नमहावनम् ।। २१

वहद्रक्तनदीरंहःप्रोह्यमानहयद्विपम् ।

शरशक्त्यृष्टिमुसलगदाप्रासासिसंकुलम् ।। २२

पर्याणावनसंनाहकवचावृतभूतलम् ।

केतुचामरपट्टौघगुप्तं शवशरीरकम् ।। २३

फणास्फुटकतूणीरकुञ्जकूजत्समीरणम् ।

शवराशिपलालौघतल्पसुप्तपिशाचकम् ।। २४

मौलिहाराङ्गदद्योतशक्रचापवनावृतम् ।

श्वशृगालकराकृष्टसान्द्रान्त्रादीर्घरज्जुकम् ।। २५

रक्तक्षेत्रक्वणत्किंचिच्छेषजीवनृदन्तुरम् ।

रक्तकर्दमनिर्मग्नसजीवनरदर्दुरम् ।। २६

वराङ्गकवचप्रख्यनिर्गताक्षिशतोच्चयम् ।

वहद्भुजोरुकाष्ठौघघोररक्तसरिच्छतम् ।। २७

साक्रन्दवन्धुवलितं मृतार्धमृतमानवम् ।

शरायुधरथाश्वेभपर्याणासंवरान्तरम् ।। २८

नृत्यत्कबन्धदोर्दण्डमण्डलानमिताम्बरम् ।

मदमेदोवसागन्धपीडार्द्रघ्राणकोटरम् ।। २९

उत्ताल्वर्धमृतेभाश्ववार्यमाणाल्पजीवितम् ।

वहद्रक्तनदीवीचिप्रहारहतदुन्दुभि ।। ३०

उह्यमानमृतेभाश्वमकरासृक्सरिच्छतम् ।

म्रियमाणनरानीकफूत्कृतासृक्प्रणालिकम् ।। ३१

स्वल्पजीवशरापूर्णमुखदृक्कान्तितस्वनम् ।

पिण्डभार्यावसागन्धवातान्तोत्पीठलोहितम् ।। ३२

उन्नासार्धमृतेभेन्द्रकराक्रान्तकबन्धकम् ।

निरधिष्ठितहस्त्यश्वपातितोच्चकबन्धकम् ।। ३३

रुदत्क्रन्दत्परिभ्रष्टशवक्षुब्धासृगुद्धति ।

मृतभर्तृगले शस्त्रत्यक्तप्राणकुलाङ्गनम् ।। ३४

सेनोत्क्रान्तततक्षिप्रबहुपान्थपरीक्षणम् ।

शवहारकराकृष्टसप्राणानुचराकुलम् ।। ३५

केशशैवालवक्राब्जचक्रावर्तनदीशतम् ।

तरत्तुङ्गतरङ्गाढ्यवहद्रक्तमहानदम् ।। ३६

अङ्गलग्नायुधोद्धारव्यग्रार्धमृतमानवम् ।
विदेशमृतसाक्रन्दहुताङ्गगजवाजिनम् ।। ३०
प्राणान्तस्मृतपुत्रेष्टमातृदेवपराभिधम् ।
हाहाहीहीतिकथितमर्मच्छेदनवेदनम् ।। ३८
म्रियमाणमथौजिष्ठद्विष्टप्रारब्धसंचयम् ।
दन्तियुद्धासमर्थाग्रमृतदेहेष्टदैवतम् ।। ३९
म्रियमाणमहावज्ञाशूराश्रितपलायनम् ।
अशङ्कितासृगावर्तभीमास्पदगमोत्सुकम् ।। ४०
मर्मच्छेदशराघातव्यथाविदितदुष्कृति ।
कबन्धबन्धप्रारब्धवेतालवदनाक्रमम् ।। ४१
उह्यमानध्वजच्छत्रचारुचामरपङ्कजम् ।
किरत्संध्यारुणं दिक्षु तेजस्कं रक्तपङ्कजम् ।। ४२
रथचक्रधरावर्तं रक्तार्णवमिवाष्टमम् ।
पताकाफेनपुञ्जाढ्यं चारुचामरबुद्बुदम् ।। ४३
विपर्यस्तरथं भूमिपङ्कमग्नपुरोपमम् ।
उत्पातवातनिर्धूतद्रुमं वनमिवाततम् ।। ४४
कल्पदग्धजगत्प्रख्यं मुनिपीतार्णवोपमम् ।
अतिवृष्टिहतं देशमिव प्रोज्झितमानवम् ।। ४५
कलापकुन्तवलितं भुशुण्डीमण्डलाकुलम् ।
मत्तनागशताकारशवतोमरमुद्गरम् ।। ४६
शिलाशिखरसंजाततालजालमिवाततम् ।
तरद्रक्तनदीतीरजातकुन्तोन्नतद्रुमम् ।। ४७
नागांसस्यूतहेत्योघवृक्षांशुकुसुमाकुलम् ।
कङ्ककृष्टान्त्ररसनावृन्दजालकिताम्बरम् ।। ४८
असृक्सरित्तीरजातकुन्तोन्नतवनद्रुमम् ।
असृक्सरोवरोर्ध्वस्थपताकानलिनीगणम् ।। ४९

रक्तकर्दमनिर्मग्ननराहूतसुहृज्जनम् ।

करीन्द्रकुणपापातनिर्यद्भग्नजनेक्षितम् ।। ५०

हेतिलूनलतैर्वृक्षैः संदिग्धार्धकबन्धकम् ।

असृङ्नदीवहद्धस्तिकटकर्पटनौगणम् ।। ५१

रक्तस्रोतःस्फुरच्छुक्लवस्त्रडिण्डीरपिण्डकम् ।

संचारनियतक्षिप्रभृत्यविच्छिन्नमानवम् ।। ५२

इतश्चेतश्च निपतत्कबन्धरवदानवम् ।

ऊर्ध्वस्थूलाक्षचक्रौघच्छिन्नसैन्यद्रवज्जनम् ।। ५३

रक्तनिःस्वनभाङ्कारफेत्काराधमृतारवम् ।

शिलामुखललद्रक्तधाराधूतरजःखगम् ।। ५४

सुतालोत्तालवेतालतालताण्डवसंकटम् ।

पर्यस्तरथदार्वन्तरर्धान्तरितसद्भटम् ।। ५५

अन्तस्थसज्जीवभटस्पन्दिस्पन्दनभीतिदम् ।

रक्तकर्दमपूर्णास्यकिंचिज्जीवकृपाच्छवम् ।। ५६

किंचिज्जीवनरोद्ग्रीवदुःखदृष्टश्ववायसम् ।

एकामिषोत्कक्रव्यादयुद्धकोलाहलाकुलम् ।

एकामिषार्थयुद्धेहामृतक्रव्यादसंकुलम् ।। ५७

विवृत्तासंख्याश्वद्विरदपुरुषाधीश्वररथ-

प्रकृत्तोष्ट्रग्रीवाप्रसृतरुधिरोद्गारसुसरित् ।

रणोद्यानं मृत्योस्तदभवदशुष्कायुधलतं

सशैलं कल्पान्ते जगदिव विपर्यस्तमखिलम् ।। ५८

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे लीलो० आहववर्णनं नामाष्टत्रिंशः सर्गः ।। ३८ ।।